श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

चोलसिंहपुरं दोड्डयाचार्य कृत

# ॥ श्री निगमान्तदेशिकविंशतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Smt. Rajashree Venkatesh of Bahrain for providing us the text of this stotram and Smt. Goda Gopal of Bangalore and Sri. Sundar Varadarajan of Chennai for thoroughly proofreading the document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री निगमान्तदेशिकविंशतिः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री कान्तरम्यविभवैकान्तरङ्गजनमेकान्त एष कलये
श्रीकान्तिदान्ति निवहैकान्तगेहपरमैकान्तिदेशिकमणिम्।
धीकान्तधीरवरलोकान्तरङ्गहितमाकान्तविग्रहयुतं
लोकान्तरोच्चधृतभूकान्तरङ्गवसदेकान्तरङ्गमनघम्॥ १॥

गङ्गातरङ्गलसदङ्गाश्वकन्धरविहङ्गाधिराजविनुतिं
तुङ्गामकल्पयदरङ्गाधिसूनुकुलसङ्गागमान्तगुरुराट्।
अङ्गारकल्परिपुभङ्गाच्छ्रमादिव भुजङ्गाधिराजविहर-
द्रङ्गाधिपाङ्घ्रियुगशृङ्गारतामरसभृङ्गायितोऽवतु स नः॥ २॥

मोचासदृक्षनिजवाचा निरस्तकविमाचारवारिजलधिं
धीचातुरीविजितवाचाटकं बहुदुराचारदूरवसतिम्।
प्राचामनन्तशुभवाचामहं खलु सदाचारपुण्यनिचयं
याचामि वेदशिखराचार्यमर्थसुषुमाचाटुवादकविताम्॥ ३॥

राजाधिराजधृतपूजामथामनुत लाजादिवत्सुरपुरी-
भूजायितश्रुतसमाजाय सूरिसमतेजास्स वेङ्कटगुरुः।
मे जायतामतुलधीजालकाय यतिराजानुरागविषयः
श्री जाह्नवीगतरसोजाननो निभृतमाजानुलम्बितभुजः॥ ४॥

घोटीमुदाकलितधाटीसमोक्तिभरपेटीसमानवपुषं
गोटीमुखादरसमाटीकमानशतकोटीकरादिविभवम्।
पाटीरलिप्ततनुवाटीस्फुरन्निगमकोटीगुरुं हृदि भजे
धाटीलसन्नरवधूटीकृपाजनितशाटीकशौरिनुतिकम्॥ ५॥

www.prapatti.com

चण्डांशुमानिव वितण्डादिनिग्रहणखण्डातिवादतिमिरे
दण्डायुधस्सुगतचण्डारिणां तुरगतुण्डाश्रयस्स जयतात्।
अण्डाधिपत्यमपि चण्डार्थ्यरङ्गपुरखण्डाधिवासविरसं
दण्डादिनामनुत शुण्डालकल्पभुजदण्डागमान्तगुरुराट्॥ ६॥

शोणारविन्दसमपाणावनीशगुरुकाणादमृष्टनिगम-
त्राणाय दीव्यदुरुबाणासनोपमपरीणाहिपुस्तकधरः।
क्षोणावलं विहरमाणानवद्यहृतगौणार्थसूक्तिरवतु
प्राणायितागमधुरीणागमान्तगुरुरेणाङ्ककल्पवदनः॥ ७॥

सन्तानदायकमनन्तार्यपुत्रमघसन्तापमोचनचणं
सन्तानभूरुहमनन्ताश्रितस्य हरिचिन्तादुरन्तमनसम्।
तं तार्किकादिकरिसन्ताडने हरिवरं तामसप्रतिभटं
दन्तावलाद्रिनिलयं तावदस्तुवदहन्तारिपुं हृदि भजे॥ ८॥

वादाहवेषु बहुवेदान्तभागहृतभेदान्यवादसरणिं
पादारविन्दविहितोदारभक्तियुतखेदापहारनिपुणम्।
श्रीदादिकेषु तृणमोदावहं दुरुपपादार्थबोधनचणं
मोदाय नौमि नतधीदायिनं सपदि वेदान्तदेशिकमणिम्॥ ९॥

नाथादिपूर्वगुरुगाथानिगूढनिजमेधा ततार्थविततिः
बोधायनादिकृतिबोधे सुदूरकृतबाधायनोऽनवरतम्।
क्रोधादिदुर्गुणविरोधानपोह्य बहुमेधावनं वितनुतात्
ताथागतादिमतयूधाचलाशनिरगाधाशयस्स गुरुराट्॥ १०॥

नानादिगन्तलसमानानवद्यकृतिगानाभितृप्तविबुधः
दीनाननुग्रहविधानादपास्तगुरुमानानथ व्यरचयत्।
यो नागभूधरविमानानुरक्तखगयानामितस्तुतिमपि
ध्यानादिनाधिगतमानायको जयतु मानार्हवेङ्कटगुरुः॥ ११॥

पापापनोदचणगोपालविंशतिसुधापानतुष्टविबुधं
कोपादिदूरमुरुतापापनोदकरमापादमौलिभजनात्।



www.prapatti.com

श्रीपादुकाविनुतिमापाद्य रङ्गपुरभूपाललब्धविभवं
श्रीपाल्यविष्णुमतदीपागमान्तगुरुमापादयामि शरणम्॥ १२॥

सम्भावयामि शरणं भावुकाय मदडम्भादिदोषरहिताः
सम्भावयन्ति भुवि यं भावभूतकृति गुम्भावबोधकुशलम्।
तं भानुकल्पमधिकं भातशिष्यकुलसम्भाषमाणमनघं
रम्भासमोरुतल सम्भासमानमनिशं भाव्यवेङ्कटगुरुम्॥ १३॥

आम्नायमौलिगुरुनाम्ना विराजति महिम्ना हरेर्मणिरिहे-
त्याम्नाय वित्ततिभिराम्नायते जगति धाम्नाऽवमानितरविः।
प्रेम्णा मुदेऽस्तु निजभूम्ना निरस्तकथकाम्नायपालनपरो
हेम्ना लसन्नळिनदाम्ना विभाति शुभसाम्नामथाब्धिरिव यः॥ १४॥

दुर्वादिवादघनगर्वापनोदपटुरर्वाननानिलयुतो
दुर्वारतापहरसर्वानुमोदचणपर्वाब्जकोटिसदृशः।
शर्वाधिको जगति सर्वाश्रितेषु गुरुगर्वानुरागरहितो
निर्वापयत्वरिमखर्वागमाञ्चलकगुर्वाख्यकालजलदः॥ १५॥

श्रीशाज्ञया कृतसुधीशावतारमुरगेशाधिकं धिषणया
दाशावतारनुतिमाशातले विनतधीशान्तये विदधतम्।
आशास्महे वरयतीशानभाष्यमणि कोशागमाञ्चलगुरुं
धीशान्तिसद्गुणनिवेशात्मकं सकलदेशाभिरामयशसम्॥ १६॥

शेषाचलाधिपतितोषाय लब्धनरवेषादलङ्कृतरसं
शेषावतारवरकाषाययोगिमतभूषायमाणवपुषम्।
योषामणिप्रचुरपाषाण हेमकृतभूषासु वा समदृशं
दोषादपेत बहुभाषाकविं विगतरोषादिकं हृदि भजे॥ १७॥

व्यासादिसूक्तिरसकासारमुक्तिनिवहासारधूतकथकं
नासादिदिव्यतनुभासा समेतमृदुहासावृतं हृदि भजे।
दासानुरागिहरिदासानुदासमवनीसारयोगिशठजि-
त्कासारयोगिवरगोसारवित्तममहं साधुवेङ्कटगुरुम्॥ १८॥

आहारनीतिमुखदेहातिपावनपरेहानिकृष्टकृतिभि-
मोहादिदुर्गुणसमूहानपोह्य बहुमाहात्म्यराजिमगमत्।
यो हारनिर्गळितभाहारिकान्तियुतदेहागमाञ्चलगुरुः
स्वाहाकरोतु गुरुनीहारमर्क इव बाहाबलोद्धतरिपुः॥ १९ ॥

साक्षादनन्तगुरुकाङ्क्षानुरूपसुतमीक्षाहृतामतततिं
द्राक्षासमोक्तिभरकाङ्क्षावशाद्व्रजदपेक्षाप्रपूरणपटुम्।
दीक्षावहं स्वमतरक्षाविधौ कुटिलशिक्षानुराजविषया-
ध्यक्षागमान्तगुरुमक्षामसूक्तिभररूक्षापहं हृदि भजे॥ २० ॥

श्री श्रीनिवासकृतमाश्रीशतोषकरधी श्री प्रदानविलस
द्वेदान्तसूरिवरमोदावहाद्भुतरसोदारविंशतिमिमाम्।
सन्मानयन्तु कृतिसन्मानिता गुणलसन्मानना बुधवरा
वात्सल्यतो जगति मात्सर्यदोषरहितास्सर्वलोकमहिताः॥ २१ ॥

॥ इति श्री निगमान्तदेशिकविंशतिः संपूर्णा ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com